पुरश्चरणपद्धतिः

नं. १३५३

Complete

6

ॐअक्षमालासंस्कारः ॐकार्पाससंभवंसूत्रंधर्मकामार्थमोक्षदं तच्चविप्र
कन्याबीदिर्निर्मितंचसुशोभनं सर्वेषामेववर्णानांरक्तंसर्वेप्सितप्रदं त्रिगुणं
त्रिगुणीकृत्यग्रंथयेद्बिल्वशाखतः ग्रंथिपितापुरोमालांततःसंस्कारमाचरेत्
मुखेमुखंतुसंयोज्यपुच्छेपुच्छंतुयोजयेत् एवंनिर्मायमालांचशोधयेत्मनिम
त्रम् क्षालयेत्पंचगव्येनसद्योजातेनतज्जलैः मंत्रंयथा सद्योजातंप्रपद्यामिस
द्योजातायवैनमः भवेभवेनातिभवेभजस्वमांभवोद्भवायनमः इतिपंचगव्ये
नक्षालयेत् अश्वत्थपत्रपत्रमोपरितांमालांप्रक्षाल्यस्थापयेत् चंदनागुरुगंधा
द्यैर्वामदेवनचर्चयेत् ॐनमोवामदेवाय ॐनमोज्येष्ठाय ॐनमोरुद्राय ॐ
नमःकालाय ॐनमःकलविकरणाय ॐनमोबलविकरणाय ॐनमोबल
प्रमथनाय ॐनमःसर्वभूतदमनाय ॐनमःमनोन्मनायनमः [illegible]ति १

धूपयेन्नामघोरेण ॐ अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यश्च सर्वतः सर्वश
र्वेभ्यो नमस्तेस्तु रुद्ररूपेभ्यः लेपयेत्तत्पुरुषेण तु ॐ तत्पुरुषाय विद्म
हे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ३ मंत्रयेत्पंचमेनैव प्रत्ये
कं च शतं शतं ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्र
ह्मणोऽधिपतिः ब्रह्मा शिवो मेऽस्तु सदाशिवोम् स्वमेरुं पंचमेनैव ततो मंत्रे
ण मंत्रयेत् ततो मालयाः प्राणान्प्रतिष्ठापयेत् मायाबीजादिकं कृत्वा रक्त
पुष्पैः प्रपूजयेत् मातृकाभिश्च प्रत्येकं रक्तपुष्पैः प्रपूजयेत् इत्यनेन रक्तपु
ष्पैः समर्चयेत् मूलमंत्रेण तां मालां पूजयेद्द्विजसत्तम ततो जपं विधाय श्री
गुह्यस्यामत्तमालां वालयेन्मध्यमाग्रतः भुक्तौ मुक्तौ तथाकृष्टौ मध्यमायां ज
पेत्सुधीः श्रेगुष्ठानामिकाभ्यां च जपेद्वश्यकर्मणि मालेमाले महामाले सर्व

मा॰
प॰
२

2

शक्तिस्वरूपिणि चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव अक्षमालांचगुह्यां
चगुरोरपिनदर्शयेत् इतिमालासंस्कारः अथपुरश्चरणविधिः तत्रादौभूमेः
परिग्रहंकृत्वा पुरश्चरणप्राकृत्तनीयदिवसेक्षौरादिकंविधाय चतुर्दिक्ष
कोणेकोणद्वयेवास्तित्रंचतुरस्रं आहारादिविहारार्थंपरिकल्प्य तत्रैवकूर्म
चक्रानुसारेणमंडपंविधाय एकभक्तंकुर्यात् परेदिनेस्नानादिकं
विधायशुद्धःसन् येचात्रविघ्नकर्तारोभुविदिव्यांतरिक्षगाः विघ्नभूता
श्चयेचान्येस्वसमंत्रस्यसिद्धिषु मयैतत्कीलितंक्षेत्रंपरित्यज्यविदूर
तः अपसर्पंतुतेसर्वेनिर्विघ्नासिद्धिरस्तुमे अस्त्रायफट् इतिमंत्रे
णाष्टोत्तरशताभिमंत्रितान् दशकीलान् दिक्षुनिखन्य तेषुॐनमःसु
दर्शनास्त्रायफट् इतिमंत्रेणअस्त्रंसंपूज्य इंद्रादिलोकपालान्ॐभूर्भुवःस्वःइत्येते

ई पू अ

लं सं	कं०	नें·
श॰ ध॰	अ	ईं०
ग॰ ध॰	पं०	नें·

उ वा प द नै

२

लोकपाला इहागच्छत इत्यावाह्य पंचोपचारैः पूजयेत् नमोयमायेत्यादिस्था
नेलेन्द्रपालं वा स्त्रीशं च संपूज्य विघ्ननिवारणार्थं गणपतिं पूजयेत् यथा अ
द्येत्यादि अमुकगोत्रो अमुकदेवशर्मा मत्कृतं व्यामुकमंत्रपुरश्चरणकर्मणि
विघ्ननिवारणार्थं गणेशपूजनमहं करिष्ये इति संकल्प्य वेदिकामध्ये अष्ट
दलकमलं विलिख्य तत्रालेटं संस्थाप्य आगच्छेत्यादिना तत्र गणेशमावाह्य
ॐ ग्लूं गं गणपतये नमः इति पंचोपचारैः पूजयेत् ततो गायत्रीं प्रथमं ज्ञाता
ज्ञातपापक्षयार्थं पूजयेत् अद्येत्यादि अमुकगोत्रोमुकदेवशर्माहं ज्ञाताज्ञातपाप
क्षयकामो ष्टोत्तरशतं वा सहस्रं सावित्रीजपमहं करिष्ये उपवासं हविष्यं वा
कुर्यात् ततः परेदिने उषसि स्नानादिकं विधाय अद्येत्यादि अमुकदेवशर्मा
अमुकदेवतायाअमुकमंत्रसिद्धि प्रतिबंधकाशेषदुरितक्षयपूर्वकं तन्मंत्र

मा॰ पं॰ १

सिद्धिकामो ऽद्यारभ्य यावत्कालेन मे स्यात्तावत्कालं ममामुकमंत्रस्य यत्संख्यजप
तद्दशांशहोमतद्दशांशतर्पणतद्दशांशाभिषेकतद्दशांशब्राह्मणभोजनरूप
पुरश्चरणमहं करिष्ये इति संकल्प्य भूतशुद्धिप्राणायामं कृत्वा स्वस्वमुद्रां बद्ध्वा
स्वस्वपद्धत्युक्तक्रमेण देवतां संपूज्य दीपे प्रज्वालिते देवतां हृदये कृत्वा प्रातःका
लमारभ्य मध्यंदिनं यावज्जपं कुर्यात् ततो होमः ततस्तर्पणं ततो मार्जनं यथा मूल
मुच्चार्यामुकदेवतां तर्पयामि नमः ततो ब्राह्मणभोजनं कुर्यात् ततो गुरवे दक्षिणां दद्यादित्यर्थः
यथासंकल्पं दद्यात् ॐ अद्य कृतैतदमुकदेवताया अमुकमंत्रस्य पुरश्चरणकर्मणः
सांगतार्थं दक्षिणाभिधं कांचनं तन्मूल्योपकरणं वामुकाय यथानामगोत्राय
गुरवे तुभ्यमहं संप्रददे इति गुरवे दक्षिणां दत्वा ऽच्छिद्रावधारणं कुर्यात् ॐ यत्सच्छि
द्रं तपश्छिद्रं यच्छिद्रं यज्ञे न मम तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः इति पुर
श्चरणपद्धतिः समाप्ता ॥

१

